वरः १६ । विन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पणः १७ । रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् १८ । आदौ षोड़श गुरवो द्वात्रिंशल्लघवस्ततः । चतुःषष्टिर्द्रुता यत्र सोऽयं मोक्षपतिर्मतः १९। श्रीरङ्गसंज्ञके ताले मगणाल्लः प्लुतौ मतौ२० । सिंहविक्रमताले तु मगणो नलगाः लगौ २१ । प्लुतौ नश्च प्लुतश्चैव ताले दीपकनामनि २२ ताले स्यान्मल्लिकामोदे लद्वयं लचतुष्टयम् २३। लचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम्२४ । अष्टकत्वस्तु चर्च्चर्य्यां विरामान्ते द्रुतौ लघुः २५ । द्रुतद्वन्द्वं भवेत्ताले कुहक्काख्ये लघुद्वयम्२६। भवेच्च विजयानन्दे लत्रयञ्च लघुत्रयम्२७। वीरविक्रमताले तु द्रुतौ लगौ ततः प्लुतः २८। टेङ्किका रगणेन स्यादेकेनैव कृतास्पदे २९ । भगणो गप्लुतौ स्यातां रङ्गाभरणनामके ३०। श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ३१ । चतद्रुता लघू द्वौ तु द्रुतो गो वनमालिनि३२। चतुर्मुखाभिधे ताले यगणानन्तरं प्लुतः। ३३ । भश्च प्लुतो लगौ विन्दुद्वयं गौ मः प्लुतस्तथा । लघुः प्लुतो द्रुतश्चैको लघुद्वयमथापि च । निःशब्दं ल चतुष्कञ्च ताले स्यात् सिंहनन्दने ३४। गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मतः ३५ । गो द्रुतौ नौ प्लुतद्वन्द्वं चन्द्रबिम्बे प्रकीर्त्तितम् ३६ । द्रुतद्वन्द्वं लघुश्चैकस्ताले स्यात्तु द्वितीयके ३७ । सकारश्च यकारश्च जयमङ्गलनामनि ३८। चत्वारो गुरवो विन्दवश्चत्वारश्च प्लुता अपि । विन्दवो दश षट् लाश्च ताले गान्धर्वसंज्ञके ३९। मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरुः ४० । गुरुर्लघुः प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तिता ४१ । गुरुद्वयं लघुद्वन्द्वं रतिताले प्रकीर्त्तितम्४२ । वसन्तताले कर्त्तव्यो नगणो सगण स्तथा४३ । जगझम्पे गुरुश्चैको विरामान्तञ्च लद्वयम् ४४ । गप्लुतौ लौ द्रुतौ लश्च प्लुतो मार्द्दितनामनि४५। कविशेखरे प्लुतः शून्यं मगौ लश्च ततो लघुः४६। लचतुष्कं विना शब्दं यत्र बोलः स उच्यते ४७। हरवल्लभताले च प्लुतो लो गौ च लद्वयम्४८ । भगणः प्लुतौ गणौ गयौ प्लुतौ लघुश्च भैरवे४९। गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ५०। चतुर्लघु मल्लताले विरामान्तं द्रुतद्वयम्५१। लगौ गौ मो नगौ गश्च लद्वयं लद्वयं पुनः । नचतुष्कं विना शब्दं ताले भैरवमस्तके५२। सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम् ५३ । एक एव प्लुतो यत्र क्रीड़ातालः स उच्यते ५४ । द्रुतद्वयं विरामान्तं ताले निःसारके मतम् ५५ । लत्रयं सविरामान्तं नौ पुनः लत्रयन्तथा । प्लुतौ गः लयुगं गश्च यत्र मुक्तावली तु सा५६। लगौ विन्दुयुगं गौ लौ रङ्गराजे प्रकीर्त्तितः ५७। लद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः । यत्र ताले स विज्ञेयो भरतानन्दसंज्ञकः ५८। आदिताले लघुश्चैक इत्याह भरतो मुनिः ५९ । भगणश्च प्लुताद्यन्तःसंपक्वेष्टकतालके ६०। एकाधिकशते ताले षष्टिर्व्यक्ततमा इमे”। अथ प्लुतादिमात्राभेदेन तालघातनम् । “ताले निष्पातहस्तः प्लुतमनुघटयेद्घातमेकं सशब्दं तत्पश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेदूर्द्ध्वतोऽधः। शून्यत्वात् पक्वतालाविति जगति पुनः ख्यातसञ्ज्ञौ सनन्दा विश्वं घातत्रयं तत् त्रिफलतनुवह्निर्बद्धयेद्दुर्लकारम । एको घातः सशब्दो द्विकल इह गुरौ शब्दहीनस्तथान्यः सोऽप्यूर्द्ध्वं याति लीलावलयवलयितोत्तानहस्ताङ्गुलीभिः । किञ्चोच्चैकैकमात्रा समुदयिनि लघौ घात एको निनादी घात्यो मात्रार्द्धभाजि द्रुतयपुषि लघोरर्द्धनादेन घातः”। संगी० दा० ३स्तवकः ।

“आदावष्टस्तथा रुद्रो ब्रह्म इन्द्रश्चतुर्दशः। दशावतारवन्द्यादिन्द्रयनाट्यं ततः परम् ।”

अथाष्टतालभेदाः । “आडः१ दोजः२ ज्योतिः३ चन्द्रशेखर४ गञ्जनं५ पञ्चतालः६ रूपकं७ समतालः८ ।”

तत्र रुद्रतालस्य भेदाः । वीरविक्रमः१ । विषमसमुद्रः२ धरणं३ वीरदशकः४ मण्डूकः५ कन्दर्पः६ ऊँशपाहिड़ः७ ध्रुवचरणं८ दशकोशी९ गजेन्द्रगुरुः१० छुटका११।”

अथ ब्रह्मतालभेदाः “ब्रह्म१ विरामब्रह्म२ षट्कला३ सप्तमात्रा४”

अथेन्द्रतालभेदाः।“देवसारः१ देवचाली२मदनदोला३ गुरुगन्धर्वः४ पञ्चाली५ इन्द्रभाषः६ ।”

अथ चतुर्द्दशतालभेदाः ।“चिक्कतालः१चन्द्रमाला२ देवमाला३ अर्द्धज्योतिः४ स्वर्गसारः५ क्षमाष्टः६ धराधारा७ वसन्तवाक्८ काककला९ कीरशब्दा१० तालघ्नी११ हर्षधारिका१२ भाषा१३ अर्द्धमाला१४ ।”

क्रमेणैषां लक्षणादि तत्रापि अष्ट तालभेदस्य लक्षणानि यथा “एकतालस्ततः शून्यं युगलं तालिका परे । सङ्गीते प्रथमः सार आड़तालः प्रकीर्त्तितः१ । एकतालञ्च शून्यञ्च क्रमेणापि त्रिधा भवेत् । शेषशून्यं कलाभेदे दोजाख्यस्य भवेत् पृथक् २ । प्रथमं युगलं तालं एक एकस्तथा परे । कलाभेदे गानमेवं ज्योतिश्च परिकीर्त्तितम् ३ । चन्द्रश्चन्द्रस्तथा युग्मं तथा चन्द्रस्तथा परे । षट् तालानि भवन्त्येवं चन्द्रशेखर-